दैनिकं ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ताः

हिमाचलप्रदेशस्य संस्कृतशिक्षकाणां नूतनः प्रकल्पः

himsanskritvartah
e-Sanskritnewspaper
नवा प्रेरणा नवोत्साहः

■ पृष्ठ-3 ■ वर्ष-3 ■ अङ्क-361

1 24.10.2024 गुरुवासरः वि.सं. २०८१ कार्तिककृष्णसप्तमी कार्तिक 8 प्रविष्टांशः

Website- www.himsanskritam.com Email-himsanskrit@gmail.com

## अक्टूबरमासस्य सप्तविंशे दिनाङ्के भविष्यति 'मन की बात' कार्यक्रमः

प्रधानमन्त्री नरेन्द्र मोदी इत्येषः अक्टूबरमासस्य सप्तविंशे दिनाङ्के आकाशवाण्याः 'मन की बात' इत्यस्मिन् कार्यक्रमे देश-विदेशस्थजनैः सह स्वविचारान् विनिमयीकरिष्यति। इदं मासिक- रेडियो - कार्यक्रमस्य पञ्चदशाधिकशततमं संस्करणं भविष्यति।

## सर्वोच्चन्यायालयेन उक्तं यत् वायुगुणवत्ताप्रबन्धनायोगस्य (CAQM) अधिनियमान्तर्गतं धान्यापशिष्टदहनदण्डस्य प्रावधानं कार्यान्वितं न भवति



हिमसंस्कृतवार्ताः। सर्वोच्चन्यायालयेनोक्तं यत् वायुगुणवत्ताप्रबन्धनायोगस्य (CAQM) इत्यस्य अधिनियमान्तर्गतं धान्यापशिष्टदहनदण्डस्य प्रावधानं कार्यान्वितं न भवति। सर्वोच्चन्यायालयेन उक्तं यत् वायुगुणवत्ताप्रबन्धनआयोगस्य (CAQM) इत्यस्य अधिनियमः वायुप्रदूषणं निवारणाय विधेः कार्यान्वयनाय आवश्यकयन्त्राणां निर्माणं विनैव निर्मितः। केन्द्रस्य प्रतिनिधित्वेन ऐश्वर्या भाटी न्यायालयाय आश्वासनं दत्तवती यत् दशसु दिवसेषु अधिनियमाः अन्तिमरूपेण निर्धारिताः पूर्णतया कार्यान्विता च भविष्यन्ति। पञ्जाब-हरियाणा राज्ययोः सर्वकारेण दोषिणः विरुद्धं धान्यअपशिष्टदहनस्य विषये किमपि कार्याचरणं न सम्पादितम् अस्मिन् विषये अपि सर्वोच्चन्यायालयेन उक्तम्।

## एनडीआरएफ इत्यनेन दाना चक्रवातस्य आगमनात् पूर्वं ओडिशायां विंशतिदलानि नियोजितानि

एनडीआरएफ इत्यनेन दाना चक्रवातस्य आगमनात् पूर्वं ओडिशायां विंशतिदलानि तथैव पश्चिमबंगाले त्रयोदशदलानि नियोजितानि सन्ति। दाना-चक्रवातस्य आगमनात्पूर्वं ओडिशा- प्रशासनेन संचेतना-प्रसारिता शिक्षण-संस्थानानि च दिनत्रयं यावत् पिहितानि। नवदिल्ल्यां वार्ताहरैः सह संवादकाले एनडीआरएफ-इत्यस्य उपमहानिरीक्षकेन मोहसेन-शाहिदी इत्यमुना कथितं यत् पश्चिमबंगाले चत्वारि दलानि भिन्नतया स्थापितानि सन्ति। तेन प्रोक्तं यत् आन्ध्रप्रदेशस्य विजागस्थानेऽपि सन्नद्धता वर्तते। उपमहानिरीक्षकेन कथितं यत् छत्तीसगढेन सह झारखण्डेऽपि दलानि सन्ति।

## प्रधानमन्त्री नरेन्द्रमोदी राष्ट्रपतिना शी जिनपिंग इत्यमुना साकं ब्रिक्ससम्मेलनावधौ मिलितवान्




हिमसंस्कृतवार्ताः। प्रधानमन्त्री नरेन्द्रमोदी रूसदेशस्यकजाननगरे ब्रिक्सइति शिखरसम्मेलनवधौ चीनदेशीयेन राष्ट्रपतिना शी जिनपिंग इत्यमुना साकं द्विपक्षीय सम्वादं कुर्वनस्ति। उपवेशनमिदं वास्तविक-नियन्त्रण-रेखायाः प्रहरित्वप्रबन्धनम् आधृत्य चीनभारतदेशयोर्मध्ये सजातनिर्णायस्य अनन्तरं महत्वपूर्णमस्तीति। प्रधानमन्त्रिणः श्रीमोदिनः चीनदेशस्य राष्ट्रपतेः मध्ये एतत् उपवेशनं विगतेषु पञ्चवर्षेषु प्रथमं सुनियोजितम् उपवेशनम् अस्ति। ह्यः श्रीपुतिनेन साकं जाते उपवेशने श्रीमोदी सबलं प्रतिपादितवान् यत् भारतं रूस-युक्रेन देशयोः सङ्घर्षस्य शान्तिपूर्णसमाधानाय साहाय्यं दास्यति। विदेशसचिवः विक्रममिस्री इत्येषः वार्ताहरान् सम्बोधितवान् यत् श्रीमोदी राष्ट्रपतिना श्रीपुतिन इत्यनेन साकं जातस्य सम्वादस्य विषये सूचना प्रदत्ता। प्रधानमन्त्री नरेन्द्रमोदी ब्रिक्सराष्ट्रेभ्यः आतङ्कवादं आतङ्कवित्तपोषणं च निवारणाय सम्भूय सहकार्यं कर्तुं आहूतवान्। सः अवदत् यत् एतादृशे गभीरविषये द्विगुणमनोभावस्य स्थानं नास्ति। कजाननगरे षोडशतमे ब्रिक्स शिखरसम्मेलनस्य समापनसत्रे श्रीमोदी यूनां मध्ये कट्टरतावादतां निवारयितुं सक्रियपदक्षेपानाम् आवश्यकतायाः उपरि बलं दत्तवान्। सः संयुक्तराष्ट्रसङ्घस्य अन्ताराष्ट्रिय-आतङ्कवाद-सम्बद्धस्य व्यापक-सम्मेलनस्य लम्बित-विषये एकत्र कार्यं कर्तुं आवाहनं कृतवान्

## शिवसेनादलेन राष्ट्रवादी कांग्रेसदलेन च आगामिने महाराष्ट्र-विधानसभा निर्वाचनार्थं स्वप्रत्याशिनां नामोद्घोषणं विहितम्

हिमसंस्कृतवार्ताः। शिवसेना दलेन राष्ट्रवादी कांग्रेसदलेन च आगामिने महाराष्ट्र-विधानसभा निर्वाचनार्थं स्वप्रत्याशिनां नामोद्घोषणं विहितम्। राष्ट्रवादी-कांग्रेसदलेन बुधवासरे महाराष्ट्रविधानसभा- निर्वाचनार्थं अष्टत्रिंशत्-प्रत्याशिनां स्वीय-प्रथमा सूचिः निस्सारिता। तत्र उपमुख्यमन्त्री अजीत-पवारः बारामती-निर्वाचनक्षेत्रात् वर्तते। यस्य सः वर्तमाने प्रतिनिधित्वं कुर्वन्नस्ति। अपरत्र छगन- भुजबल इत्येषः येओलातः, दिलीप-वलसे-पाटिलः, अम्बेगांवक्षेत्रात्, हसन मुश्रीफः कागलतः, धनञ्जय-मुण्डे च परलीतः निर्वाचनद्वन्द्वे भागं भजिष्यति। विधानसभायाः उपाध्यक्षः नरहरि झिरवालः, धर्मराव आत्रामः, अदिति तटकरे इत्येते क्रमशः डिंडोरी-अहेरी-श्रीवर्धनक्षेत्रैः निर्वाचनद्वन्द्वे आगन्तुं सन्नद्धाः सन्ति। शिवसेनया स्वीय-पञ्चत्वत्त्वारिंशत् प्रत्याशिनां समुद्घोषणा कृता। तत्र मुख्यमन्त्री एकनाथ शिंदे इत्येषः कोचरी-पचपाखड़ी क्षेत्रात् पुनः निर्वाचने भागं भजिष्यति। अस्य क्षेत्रस्य सः वर्तमानेऽपि प्रतिनिधित्वं कुर्वन्नस्ति। एतदतिरिच्य राज्यमन्त्री अब्दुल सत्तारः सिल्लोऽक्षेत्रात्, सञ्जय राठौड़ः दिग्रसक्षेत्रात्, संतोष-बांगरः कलमनुरीतः, सहैव सञ्जय-शिरसाटः छत्रपति संभाजीनगर-पश्चिममतः निर्वाचने भागं ग्रहीष्यति। अत्रान्तरे महाराष्ट्र-नवनिर्माणसेनया अपि पञ्चच्चत्वारिंशत्-प्रत्याशिनां स्वीया द्वितीय सूचिः निस्सारिता। मनसे-प्रमुखस्य राज-ठाकरे इत्यस्य पुत्रः अमित ठाकरे माहिमक्षेत्रात् निर्वाचनार्थं सन्नद्धो वर्तते।

## केरले कांग्रेस-प्रत्याशिना प्रियंका-गान्धिना वायनाड-संसदीयक्षेत्रात् स्वीयनामाङ्कनं निवेदितम्

केरले कांग्रेस-प्रत्याशिना प्रियंका-गान्धिना गतबुधवासरे मध्याह्न वायनाड-संसदीयक्षेत्रात् स्वीयनामाङ्कनं निवेदितम्। अस्मिन् निर्वाचन क्षेत्रे उपनिर्वाचनं अग्रिममासस्य त्रयोदशदिनाङ्के चेलाक्कारा-पलक्कड़-विधानसभाक्षेत्रैः सह भविष्यति। निर्वाचनद्वन्द्वे प्रियंकागान्धिनः अयं प्रथमः पदक्षेपः भविष्यति। कलपेट्टानगरे तस्याः आगमने भव्यं स्वागतम् अभवत्। तत्र सहस्त्रशैः दलकार्यकर्तृभिः करताडनेन, ध्वजोत्तोलनेन सहैव जयद्योषेण सह तस्याः स्वागतं कृतम्। सा विपक्षनेत्रा राहुलगान्धिना, एआईसीसी, महासचिवेन सी वेणुगोपालेन सह, तथैव कांग्रेसस्य एवं यूडीएफगठबन्धनस्य सहयोगिभिः सह पथपदर्शने-भागं गृहीतवती। प्रियंका गान्धिना सह कांग्रेसस्य अध्यक्षः मल्लिकार्जुन खड्गे, लोकसभायां विपक्षनेता राहुलगान्धिः, कांग्रेससंसदीय- दलस्य नेतृ सोनिया गान्धी इत्येषपि आसीत्।

## पंजाबप्रान्ते आरक्षिदलेने धान्यापशिष्टदहनस्य दोषिणः विरुद्धं विध्याधारितं कार्याचरणम् कर्तुं वृहद् अभियानं समारब्धम्




हिमसंस्कृतवार्ताः। सर्वोच्चन्यायालयस्य वायुगुणवत्ताप्रबन्धनायोगस्य च निर्देशानां अनुपालनेन धान्यअपशिष्टदहन प्रकरणेषु न्यूनताऽनेतुं पंजाब-आरक्षिणः कृषकान् धान्यअपशिष्टदहनस्य हानिकारकप्रभावविषये शिक्षितुं तथा च दोषिणः विरुद्धं विध्याधारितं कार्याचरणम् कर्तुं वृहद् अभियानं समारब्धम् अस्ति। आरक्षी, विधि व्यवस्थायाः महानिदेशकाय अर्पित शुक्लवर्याय निरीक्षणाय समुचितकार्याचरणाय च नियुक्तः अस्ति।

## क्रिकेटक्रीडावार्ता

क्रिकेटप्रतिस्पर्धायां, भारतन्यूजीलैण्डदलयोर्मध्ये द्वितीया क्रिकेट निकषस्पर्धा पुणेनगरस्य महाराष्ट्र-क्रिकेट-सङ्घ-क्रीडाङ्गणे गुरुवासरे प्रातः सार्धनववादनतो भविष्यति।

## गीतोपदेशः

**यद्यप्येते न पश्यति लोभोपहतचेतसः ।**
**कुलक्षयकृतं दोषं मित्रद्रोहे च पातकम् ॥ ३७ ॥**
**कथं न ज्ञेयमस्माभिः पापादस्मान्निवर्तितुम् ।**
**कुलक्षयकृतं दोषं प्रपश्यद्भिर्जनार्दन ॥ ३८ ॥**

**शब्दार्थ-** यदि – यदि; अपि – भी; एते – ये; न – नहीं; पश्यति - देखते हैं; लोभ – लोभ से; उपहत – अभिभूत; चेतसः – चित्त वाले; कुल-क्षय – कुल-नाश; कृतम् – किया हुआ; दोषम् – दोष को; मित्र-द्रोहे – मित्रों से विरोध करने में; च – भी; पातकम् – पाप को; कथम् – क्यों; न – नहीं; ज्ञेयम् – जानना चाहिए; अस्माभिः – हमारे द्वारा; पापात् – पापों से; अस्मात् – इन; निवर्तितुम् – बन्द करने के लिए; कुल-क्षय – वंश का नाश; कृतम् – हो जाने पर; दोषम् – अपराध; प्रपश्यद्भिः – देखने वालों के द्वारा; जनार्दन – हे कृष्ण!

### भावार्थ

हे जनार्दन! यद्यपि लोभ से अभिभूत चित्त वाले ये लोग अपने परिवार को मारने या अपने मित्रों से द्रोह करने में कोई दोष नहीं देखते किन्तु हम लोग, जो परिवार के विनष्ट करने में अपराध देख सकते हैं, ऐसे पापकर्मों में क्यों प्रवृत्त हों?

**सूचना-** हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुद्धिनां कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम् प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे कस्बा कोटला, जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः- १७७१११

## Kangra News: ढगवार- दुग्ध-प्रक्रिया- संयन्त्रे कार्यं प्रारब्धम्; २५० कोटिरूप्यकाणि व्ययिष्यन्ते, पञ्चजनपदेभ्यः दुग्धम् आगमिष्यति



हिमसंस्कृतवार्ताः - काङ्गड़ा। राज्यस्य बृहत्महत्त्वाकांक्षिपरियोजनायाः दुग्धप्रक्रियासंयंत्रढगवारस्य कार्यम् आरब्धम् अस्ति। ढगवारे स्थितानि षट् पुरातनानि भवनानि अपहृत्य, अत्र आधुनिकदुग्धसंयंत्रस्य निर्माणं क्रियते। अस्मिन् दुग्धसंयन्त्रे २५० कोटिरूप्यकाणि व्यय्यन्ते। अस्याः परियोजनायाः लाभः काङ्गड़ा, चम्बा, ऊना, हमीरपुरं, मण्डी मण्डलानां कृषकाणां कृते भविष्यति। परन्तु चतुर्मार्गपरियोजनायाः निर्माणानन्तरं अन्यजनपदेभ्यः दुग्धं गृहीत्वा अत्र संसाधयितुं योजना अपि अस्ति। एतत् एव न, अस्मात् संयंत्रात् १५० जनाः प्रत्यक्षं जीविकां प्राप्नुयुः, १५० सहकारीसंस्थाः च निर्मिताः भविष्यन्ति, १० सहस्राधिकानां जनानां जीविका अपि भविष्यति। धर्मशाला- ग्रामीणक्षेत्रे एषा महती जीविकापरियोजना अस्ति।

अस्य संयंत्रस्य समाप्तेः अनन्तरं हिमाचलप्रदेशदुग्धसङ्घः अस्य दुग्धप्रक्रियासंस्थानस्य संचालनं करिष्यति। आधुनिकदुग्धप्रक्रियासंस्थाने दधि, तक्रम्, नवनीतम्, घृतं, पनीर, सुस्वादयुक्तं दुग्धं, पायसं, मोजेरेला- पनीरं च इत्यादीनि विविधानि उत्पादनानि अपि उत्पादयिष्यन्ति। ढगवार दुग्धप्रसंस्करण- संयंत्रस्य उन्नयनस्य मुख्योद्देश्यं काङ्गड़ा, मण्डी, हमीरपुरं, चम्बा, ऊना जनपदेषु कृषकाणां अर्थव्यवस्थां सुदृढां कर्तुं वर्तते। सम्प्रति परेल, लालसिंघी, बिन्द्राबन, जलाडी, बङ्गाना, मीलवां इत्येतेभ्यः दुग्धं प्रसंस्करणार्थं संयंत्रं प्रति आगच्छति। महत्त्वाकांक्षी योजना प्रतिदिनं १.५० लक्षसेटकं (एलएलपीडी) प्रक्रियां कर्तुं वर्तते, यस्य विस्तारः सम्भाव्यतया प्रतिदिनं त्रिलक्षसेटकपर्यन्तं कर्तुं शक्यते। १९८६ तमे वर्षे स्थापितस्य अस्य संयंत्रस्य वर्तमानक्षमता २० सहस्रसेटकम् अस्ति।

## Himachal Tourism: अस्मिन् शिशिरे पर्यटकाः कल्पायां स्केटिङ्ग-क्रीडायाः आनन्दं लब्धुं शक्नुवन्ति

हिमसंस्कृतवार्ताः- कार्यालीयः प्रतिनिधिः।



शिशिरे कल्पनगरम् आगच्छन्तः पर्यटकाः साहसिकक्रीडाप्रियाः युनः च अस्मिन् समये अत्र हिमस्केटिङ्गं रोलरस्केटिङ्गं च आनन्दयितुं शक्नुवन्ति। अष्टवर्षस्य दीर्घप्रतीक्षायाः अनन्तरं कल्पायां हिमस्केटिङ्ग-क्रीडाङ्गणस्य निर्माणकार्यं प्रायः एकसप्ताहेन सम्पन्नं भविष्यति। कल्पायां हिमस्केटिङ्गस्य निर्माणकार्यं द्रुतगत्या प्रचलति। अस्य निर्माणं ४९ लक्षरूप्यकाधिकं व्ययेन क्रियते। स्केटिङ्ग- क्रीडाङ्गणस्य निर्माणेन मण्डलस्य युनः साहसिकक्रीडायाः प्रशिक्षणं प्राप्नुयुः, भारतात् विदेशात् च आगच्छन्तः पर्यटकाः अपि स्केटिङ्ग-क्रीडायाः आनन्दं प्राप्तुं शक्नुवन्ति। पर्यटनकार्याणां प्रवर्धनेन सह युनां कृते नूतनाः जीविकायाः अवसराः अपि उद्घाटिताः भविष्यन्ति। हिमस्केटिङ्ग-क्रीडाङ्गणस्य कार्यं २०१६ तमे वर्षे काङ्ग्रेस-सर्वकारस्य पूर्वकार्यकाले आरब्धम्। २०२२ तमे वर्षे सम्पन्नम्, परन्तु रिङ्क-मध्ये यदा प्रशिक्षिणं जातम् तदा असफलम् अभवत्। उद्यानमन्त्री जगतसिंहनेगी इत्यस्य निर्देशानुसारं पुनः रिङ्कस्य कार्यम् आरब्धम्। प्रथमं रिङ्क-मध्ये शिलाः स्थापिताः, ततः पीसीसी-कोटा-शिलाः स्थापयित्वा तस्य निर्माणं क्रियते।

आइसस्केटिंग एसोसिएशन किन्नौरस्य अध्यक्षः विक्रमसिंहनेगीः अवदत् यत् काङ्ग्रेसस्य कार्यकाले कल्पायां रिङ्कस्य निर्माणार्थं ४९,०२,४७८ रुप्यकाणां राशिः अनुमोदिता। २०१६ तमे वर्षे अस्य रिङ्कस्य निर्माणकार्यं आरब्धम्, परन्तु शासनपरिवर्तनानन्तरं कार्यं अनिश्चिततायां एव अभवत्। उद्यानमन्त्री जगतसिंहनेगी इत्यस्य प्रयत्नेन कल्पायाम् एकमात्रं रिङ्कं सज्जीकृतं भवति। अस्मिन् युनः स्केटिङ्ग-सहितं रोलर- स्केटिङ्ग- क्रीडायाः अपि आनन्दं लप्स्यन्ते।

## हिमाचले कार्पमत्स्यपालनं ७,३६७.०३ मेट्रिकटनं यावत् अभवत्- मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः




हिमसंस्कृतवार्ताः - शिमला। मुख्यमन्त्री सुखविन्दरसिंहसुक्खुः अवदत् यत् हिमाचलप्रदेशे कार्पमत्स्यस्य उत्पादनं गतवर्षे ६,७६७.११ मेट्रिकटनस्य तुलनायां ७,३६७.०३ मेट्रिकटनपर्यन्तं वर्धितम्। सः अवदत् यत् सम्प्रति प्रायः २६०० मत्स्यजीविनः कार्पमत्स्यपालनं कुर्वन्ति, उत्पादनवृद्ध्या तेषां अर्थव्यवस्था सुदृढा भवति। मुख्यमन्त्री उक्तवान् यत् वर्तमानराज्यसर्वकारः मत्स्यजीविभ्यः उच्चगुणवत्तायुक्तानि मत्स्यबीजानि प्रदाति, राज्ये सप्त सर्वकारीय-कार्पमत्स्यपालनकेन्द्राणि स्थापितानि सन्ति। राज्यमत्स्यविभागः कृषकाणां कृते उच्चगुणवत्तायुक्तानि मत्स्यबीजानि प्रदातुं अनेकानि पदानि गृह्णाति।

सः अवदत् यत् २०२४ तमस्य वर्षस्य मे-मासे विभागेन भुवनेश्वर-नगरस्य नेशनल फ्रेशवाटर फिश ब्रूड बैंक इत्यस्मात् उन्नतानि अमूर-कार्प-बीजानि क्रीतानि सन्ति। एतेषां बीजानां उपयोगेन सोलनमण्डलस्य नालागढे मत्स्यबीजफार्मे, ऊनामण्डले गगरेट मत्स्यबीजफार्मे च ब्रूड-सञ्चयस्य विकासाय क्रियते। आगामिवर्षात् एतेभ्यः कृषिक्षेत्रेभ्यः उच्चगुणवत्तायुक्तानि बीजानि कृषकाणां कृते उपलभ्यन्ते। तेषाम् उत्पादनस्य दरः पारम्परिकजातीयानाम् अपेक्षया २० प्रतिशतं अधिकम् अस्ति, येन कृषकाणां आयः वर्धते। सुखविन्दरसिंहसुक्खुः इत्यनेन उक्तं यत् राज्यसर्वकारेण २०२४ तमस्य वर्षस्य जूनमासे भुवनेश्वरस्य अनुसन्धानसंस्थायाः केन्द्रीयमधुरजलपशुपालनसंस्थाभिः सह सहमतिपत्रे हस्ताक्षरं कृतम्। अस्य ज्ञापनपत्रस्य अन्तर्गतं जयन्तीरोहु- अमृत- कटला- प्रजातीयानां गुणवत्ता- सुधारितबीजानि उपलभ्यन्ते। एतेषां प्रजातीनां ब्रूड स्टॉक मत्स्यबीजफार्म, नालागढ इत्यत्र विकसितः अस्ति, आगामिवर्षद्वये कृषकाणां कृते उन्नतबीजानि उपलब्धानि भविष्यन्ति। एतेषां प्रजातीनां वृद्धिः पारम्परिकजातीयानां अपेक्षया २०-२५ प्रतिशतम् अधिकः भवति, तेषां रोगप्रतिरोधः अपि अधिकः भवति।

कृषकाणां कृते उत्तमं प्रशिक्षणं दातुं ऊनामण्डलस्य गगरेट इत्यत्र मत्स्यविभागेन ५ कोटिरूप्यकाणां व्ययेन आधुनिकं प्रशिक्षणकेन्द्रं स्थापितम् अस्ति। एतदतिरिक्तं शीघ्रमेव जिलासोलनस्य नालागढे विभागेन कार्पफिश ब्रूडबैङ्कस्य स्थापना भविष्यति। उद्योगमन्त्री हर्षवर्धन चौहान इत्यनेन एचपीएसआईडीसी इत्यस्य पक्षतः आपदा राहतकोषाय मुख्यमन्त्री सुक्खुः इत्यस्मै ५१ लक्षरूप्यकाणां राशिः चेकमाध्यमेन प्रदत्ता। अस्मिन्नवसरे एचपीएसआईडीसी उपाध्यक्षः विशाल चम्बियालः, सचिवः उद्योगम् आरडी नजीमः, एमडी एचपीएसआईडीसी राजेश्वर गोयलः अपि उपस्थिता अभवन्।

## PMKSY: प्रधानमन्त्रीकृषि-सिञ्चनयोजनायाः 'प्रतिक्षेत्रं जलम्'' (हर खेत को पानी) योजनायाः अन्तर्गतं हिमाचलं प्रति ३८.६२ कोटिरूप्यकाणि विमोचितानि



प्रधानमन्त्री- कृषि- सिञ्चन- योजनायाः (पीएमकेएसवाई) अन्तर्गत 'हर खेत को पानी' इत्यस्मै ३८.६२ कोटिरूप्यकाणां द्वौ अंशौ विमोचितौ। हिमाचलस्य उपमुख्यमंत्री मुकेश अग्निहोत्री इत्यनेन सोशल मीडियापटले एषा सूचना दत्ता। सः प्रधानमन्त्री-कृषि- सिञ्चन- योजनायाः अन्तर्गतं राज्यसर्वकाराय ३८.६२ कोटिरूप्यकाणाम् अंशद्वयं विमोचयितुं केन्द्रीयजलशक्तिमन्त्री सी. आर. पाटिलस्य आभारं प्रकटितवान्। प्रधानमन्त्री-कृषिसिञ्चनयोजनायाः (PMKSY) अन्तर्गतं प्रतिक्षेत्रं जलम्' (HKKP) योजनायाः उद्देश्यं क्षेत्रेषु जलस्य उपलब्धतां वर्धयितुं कृषियोग्यभूमिं विस्तारयितुं च अस्ति। तदतिरिक्तं कृषिक्षेत्रेषु जलस्य उपयोगस्य दक्षतां वर्धयितुं जलबचतप्रविधिं च स्वीकर्तुं योजना अपि केन्द्रीभूता अस्ति।

## नवम्बरमासस्य प्रथमे दिनाङ्के दीपावली समाचरणीया



हिमसंस्कृतवार्ताः- कालिकाभवनम्, देहरादूनम्।

दीपावलीपर्व आधृत्य संशयः उत्पन्नः क्वचित् 31 अक्तूबर अथ प्रथमनवंबर इति चर्चायाः विषयो विद्यते। तन्मध्ये उत्तराखंड विद्वत सभया विभिन्न धार्मिक संघटनानि समामंत्र्य गोष्ठी समायोजिता। परिक्षेत्रीयपञ्चाङ्गानुसारं तत्र शास्त्रीयतथ्यानि परिचर्व्य निर्णीतं यत् अमावस्या तिथिः दिनद्वये प्रवर्तते चेत् परेऽह्नि दीपावली समाचरणीया। समागतेभ्यः सभाध्यक्षेण धन्यवादो विहितः। अवसरे सांस्कृतिक सचिवः, सहसचिवः, वैदिक ब्राह्मण सभाध्यक्षः, नेपाली ब्राह्मण सभाध्यक्षः, उत्तराखंड पुरोहितसमाजाध्यक्षः, परशुरामचतुर्वेदविद्यालयस्य प्राचार्यः, भूतपूर्वाः अध्यक्षाः, महासचिवः, संरक्षकाः, मार्गदर्शकाः, भवनश्रीकालिकामंदिरसमितिश्च समुपस्थिताः आसन्

# तीर्थराजः प्रयागराजः भवति देशस्य आस्थायाः केन्द्रम्



- सप्तपुस्तानां मोक्षं दापयितुं महाकुम्भात् पूर्वमेव आगच्छति 'भगीरथः'
- प्रवासिभिः सहैव प्रयागराजस्य ब्राह्मणाः, पुरोहिताः, पण्डिताश्च अपि सन्ति महता उत्साहे
- योगिसर्वकारस्य दृढनिर्देशाः, श्रद्धालुनां प्रत्येकस्याः समस्यायाः झटिति कुर्वन्तु समाधानम्

प्रयागराज, 23 अक्टूबर : महाकुम्भं 2025 विश्वस्य भव्यतमं सांस्कृतिकं आयोजनं कर्तुं गच्छन्त्याः योगिसर्वकारेण प्रयागराजस्य घट्टे स्वस्य कुशलतमाः अधिकारिणः अवतरिताः। धार्मिककार्याणां विषये सर्वकारस्य स्पष्टनीतेः फलस्वरूपं देशस्य प्रत्येकं कोणात् बहूनां श्रद्धालुनाम् आगमनम् आरब्धम् अस्ति । विदेशेभ्यः जनाः अपि स्वसप्तपुस्तानां मोक्षं दापयितुं सङ्गमनगरं प्राप्तुम् आरब्धाः सन्ति । योगिसर्वकारेण अधिकारिभ्यः दृढनिर्देशाः सन्ति यत् बहिष्ठात् प्रयागराजं बहुसङ्ख्येन आगच्छन्तः भक्ताः किमपि प्रकारस्य समस्यायाः सम्मुखीकरणं न कुर्वन्तु। महाकुम्भविषये जनानां मध्ये प्रचण्डोत्साहः वर्तते। प्रतिदिनं आस्थायै विश्वासाय च आगच्छन्तः जनानां सङ्ख्यां दृष्ट्वा तीर्थराजप्रयागराजः एकप्रकारेण देशस्य धार्मिककेन्द्रं भवति ।

## वर्धयितुम् आरब्धा श्रद्धालुनां सङ्ख्या

प्रयागराजस्य सङ्गमघट्टस्य पुरोहितः पण्डितः महेन्द्रनाथशर्मा इत्यनेन कथ्यते यत् महाकुम्भात् पूर्वमपि भारतात् विदेशात् च स्वपूर्वजानां प्राणानां शान्तिं याचयितुम् आगच्छन्तानाम् अप्रवासीनां सङ्ख्या सहसा वर्धयितुम् आरब्धा अस्ति। अत्र बहुसङ्ख्यकाः जनाः स्वसप्त-अष्ट-जन्मनां मुक्तिं कर्तुं संस्कारं कर्तुं च आगच्छन्ति । एतदतिरिक्तं भारतात् बहिष्ठात् अपि बहुसङ्ख्यकाः जनाः आगच्छन्ति, ये एतादृशीनां दीर्घजन्मनां विषये अवगताः न सन्ति । प्रयागराजस्य घट्टे उपस्थिताः पुरोहिताः अपि तेभ्यः एतादृशी लिखितसूचनाः प्रयच्छन्ति ।

## योगिसर्वकारस्य दिवारात्रौ प्रचल्यमानं नवनिर्माणं दृष्ट्वा जनेषु उत्साहः

प्रयागराजस्य प्रसिद्धप्रयागवालसुब्रमण्यमशास्त्री उर्फ चारी जी इत्यस्य मते योगिसर्वकारस्य दिवारात्रौ प्रचल्यमानं नवनिर्माणं दृष्ट्वा स्थानीयजनैः सहैव आप्रवासीनां मध्ये प्रचण्डोत्साहः वर्तते । प्रयागराजस्य घट्टे ब्राह्मण-पुरोहित-पण्डित चेत्यादीनबां समीपम् आगच्छन्तीनां जनानां दीर्घपङ्क्तिः निर्मातुम् आरब्धा अस्ति ।

## देशस्य प्रत्येककोणात् आगच्छन्तः श्रद्धालवः

महाकुम्भस्य सज्जतां दृष्ट्वा न केवलम् उत्तरप्रदेशात् अपितु देशस्य प्रत्येककोणात् श्रद्धालुनाम् आगमनम् आरब्धम् अस्ति। प्रयागराजस्य पुरोहिताः प्रतिदिनं आन्ध्रप्रदेशः, केरलः, कर्नाटकः, तमिलनाडुः, मध्यप्रदेशः, राजस्थानं, तेलङ्गाना चेत्यादिभ्यः अनेकेभ्यः राज्येभ्यः सहस्राणां जनानां कृते संस्कारं कुर्वन्ति । एतेषाम् अतिरिक्तम् अमेरिका, कनाडा, मॉरिशस, आस्ट्रेलिया, रूस चेत्यादिषु देशेषु निवसन्तः भारतीयाः अपि गङ्गामातुः नमस्कृत्य आगमनम् आरब्धवन्तः । बहुसङ्ख्यकाः जनाः अपि स्वपितृभस्मम् आनयन्ति ।

## धार्मिककार्याणां कृते सामूहिककार्यम्

सङ्गमस्य तटे धार्मिककार्याणां कुशलप्रबन्धनार्थं सम्पूर्णं सामूहिककार्यं क्रियते। तत्सदृशं दायित्वं पश्यन् पङ्कजपाण्डेयः कथयति यत् अत्र आगच्छन्तः जनाः स्वपितृणां प्राणानां शान्तिं कृते संस्कारं कुर्वन्ति । ब्राह्मणानां कृते दानं दीयते, येन अत्र बहुसङ्ख्यकानां जनानां रोजगारः अपि प्राप्यते ।

## ऐतिहासिकं महत्त्वम्


एतादृशः विश्वासः अस्ति यत् इक्ष्वाकुवंशीयः नृपः भगीरथः तीव्रतपस्य माध्यमेन गङ्गां पृथिव्यां अवतारितवान् इति । तदनन्तरं सः कपिलमुनेः शापेन दग्धान् षष्टिसहस्राणि सगरपुत्रान् मुक्तवान् । गङ्गामातरं पृथिव्याम् आनयितुं श्रेयः भगीरथाय गच्छति । तस्याः नाम्ना एव माता अपि भागीरथी इति उच्यते ।

# सर्वासु श्वश्रूषु स्नुषासु च तादृशः समन्वयः भवेत्

*हास्यकणिका विशेषज्ञा- विदुषी अग्रवाल*
*प्रेरणास्रोतः- महाभागः महेन्द्रमिश्रमहोदयः*

कलायः इत्युक्ते मटरस्य ऋतुः भविष्यति, मातुः पतिपत्नीयोः मध्ये च वार्तालापम्

**पत्नी-** गच्छतु, कलायः (मटर) आनयतु।
**पतिः-** अहं न आनयामि, अतीव शीतः अस्ति!
**मातुः-** कलायः किमर्थं न आनयति? आलस्यः जातः। क्षौरकर्म अपि न कृतवान्, साधुसमानः दृश्यते।
**पतिः-** तयोः पुरतः न उपविष्टः, मम उपहासं कुरुतः। किमपि कार्यम् सदैव वदथः। अहं न आनयामि, अहं बहिः गत्वा भोजनं करिष्यामि।
पति एकः भोजनालयं (होटल) गतवान्।
**पति-** कार्यरतव्यक्तिमध्ये वार्तालापम्
**पतिः-** भोजने किम् अस्ति?



कार्यरत व्यक्तिः:-
कलायआलूकम्
कलाय________
कलाय________
कलाय________ इत्यादयः
पतिः न केवलं, रोटिका उपसेचनं (चटनी) च।
कार्यरतव्यक्तिः:- किम् उपसेचनं (चटनी)?
कलायधनियाकम्
कलाय________
कलाय________
कलाय________ इत्यादि
**पतिः-** (सक्रोधम्) किमपि न आनयतु। अहं गृहं गत्वा भोजनं करिष्यामि।
गृहम् आगत्य, भार्याम् उक्तवान्- शीघ्रं शीघ्रं भोजनम् आनयतु। बुभुक्षा बहु अस्ति।
**माता-** आवां भोजनं न पचावः। प्रथमं कलायः आनयतु।
पतिः-

# बीएसएनएल इत्यनेन २४ वर्षेभ्यः परं 'लोगो (Logo) नारा' च परिवर्तिता, ७ नवीनसेवाः प्रारब्धा, उत्तमं संपर्कं प्राप्स्यन्ति उपभोक्तारः

बीएसएनएल इत्यनेन स्वसेवायाः उन्नयनार्थं प्रथमं सोपानं कृतम् अस्ति। सर्वकारीयदूरसञ्चारकम्पनी शीघ्रमेव व्यावसायिकरूपेण 4G सेवां प्रारभ्यते। तत्रैव, आगामिवर्षे जूनमासे ५जी सेवायाः घोषणामपि कर्तुं शक्नोति। बीएसएनएल इत्यनेन सद्यः एव आयोजिते 'इण्डिया-मोबाइल-काङ्ग्रेस' (आईएमसी) इत्यस्मिन् स्वस्य आगामिनां बहूनां सेवानां प्रदर्शनं कृतम् आसीत्। अद्य दिल्लीनगरे आयोजिते कार्यक्रमे कम्पनी स्वस्य नूतनं लोगो, नारा च प्रदर्शितवती अस्ति। तदतिरिक्तं कम्पनी ७ नवीनसेवाः अपि प्रस्तुतवती अस्ति।

## बीएसएनएल इत्यस्य नूतनः 'लोगो'

बीएसएनएल इत्यनेन २००० तमे वर्षे अनन्तरं स्वस्य 'लोगो' इत्यस्य परिवर्तनं कृतम् अस्ति। अपि च इदानीं नारा अपि परिवर्तिता अस्ति। बीएसएनएल-संस्थायाः चिह्ने पूर्वं नीलवर्णीयः, रक्तवर्णीयः च बाणः आसीत्, यः अधुना श्वेतवर्णीयः, हरितः च इति परिवर्तितः अस्ति। यदा तु पूर्वस्य 'लोगो' इत्यस्य धूसरवर्णीयं वृत्तं आसीत्, यत् अधुना सम्पूर्णतया परिवर्तितम् अस्ति। 'लोगो' इत्यस्य डिजाइनं पूर्ववत् एव स्थापितं अस्ति। मध्ये मण्डलस्य वर्णः कुङ्कुमरूपेण परिवर्तितः अस्ति। अपि च भारतस्य मानचित्रं मण्डले दृश्यमानं भविष्यति। बीएसएनएल इत्यस्य नूतन 'लोगो' मध्ये भारतीयध्वजस्य त्रयः अपि वर्णाः सर्वकारेण उपयुज्यन्ते। बीएसएनएल इत्यनेन 'भारतस्य संयोजनम्' (Connecting India) इति पुरातनं नारा स्थाने 'भारतस्य संयोजनम्' (Connecting Bharat) इति परिवर्तनं कृतम् अस्ति। केन्द्रीयसञ्चारमन्त्री ज्योतिरादित्य सिंधिया तथा बीएसएनएल इत्यस्य वरिष्ठ-अधिकारिणः कम्पनी इत्यस्याः नूतनस्य 'लोगो' इत्यस्य अनावरणं कृतवन्तः।

**स्पैम मुक्त संजालः (नेटवर्कः)**

एआइ मार्गेण स्पैम-कॉल-सन्देशान् च अवरुद्ध्य बीएसएनएल-संस्थायाः प्रौद्योगिकी प्रवर्तते। अधुना उपयोक्तृभ्यः वञ्चनपूर्णाः आह्वानाः सन्देशाः च जालस्तरस्य एव अवरुद्धाः भविष्यन्ति।

## राष्ट्रीय वाई-फाई रोमिंग

सर्वकारीयदूरसञ्चारकम्पनी प्रथमं एफटीटीएच आधारितं वाई-फाई रोमिंग सेवां प्रारब्धवती अस्ति। बीएसएनएल-उपयोक्तृभ्यः हॉट-स्पॉट्-स्थानेषु उच्चगति-अन्तर्जाल-प्रवेशस्य सुविधा विना अतिरिक्त-शुल्कं प्राप्स्यति।

## आईएफटीवी (IFTV)

बीएसएनएल इत्यनेन प्रथमा फाइबर आधारिता अंतर्जाल लाइव टीवी सेवा प्रारब्धा। एफटीएच (FTH) संजालमार्गेण उपयोक्तारः 'पे टीवी' इत्यत्र ५०० तः अधिकानि लाइव टीवी चैनल्स द्रष्टुं शक्नुवन्ति।



## एटीएस कियोस्क

'भारतसञ्चार निगम लिमिटेड' इत्यनेन सिमकार्ड कृते कियोस्क इव एटीएम इत्यस्य सुविधा आरब्धा अस्ति। एतत् कियोस्कं देशस्य रेलस्थानकानि सहितं सार्वजनिकस्थानेषु स्थापितं भविष्यति, येन ग्राहकाः सिम २४*७ क्रयणस्य उन्नयनस्य च सुविधां प्राप्नुयुः।

## 'डायरेक्ट-टू-डिवाइस" (D2D) सेवा

बीएसएनएल इत्यनेन प्रत्यक्ष-यन्त्र-सेवा (डायरेक्ट-टू-डिवाइस सर्विस) अपि घोषिता, या उपग्रहेण सह मोबाईल-जालस्य एकीकरणेन उत्तमं संपर्कं प्रदास्यति।

## आपदा प्रतिक्रिया सेवा

सर्वकारीयदूरसञ्चारकम्पनी जलप्रलयस्य वा अन्यप्राकृतिकविपदानां समये संपर्कार्थं आपत्कालीनगुप्तसञ्चारविपदाप्रतिक्रियासञ्चारसेवाम् आरब्धवती, येन प्रभावितक्षेत्रेषु संपर्कं प्रदातुं सर्वकारस्य राहतसंस्थानां च सहायता भविष्यति। एषा ड्रोन अथवा गुब्बारा-आधारितसञ्चारव्यवस्था भविष्यति।